"अथात आतुरोपद्रवचिकित्सितं व्याख्यास्यामः । स्नेहपीतस्य वान्तस्य विरिक्तस्य स्रुतासृजः । निरूढस्य च कायाग्निर्मन्दो भवति देहिनः ॥ सोऽन्नैरत्यर्थगुरुभिरुपयुक्तैः प्रशाम्यति । अल्पोमहद्भिर्बहुभिस्काष्ठादितोऽग्निरिवेन्धनैः ॥ सचाल्पैर्लघुभिस्त्वान्नैरुपयुक्तैर्विवर्द्धते । काष्ठैरणुभिरल्पैश्च सम्भुक्षित इवानलः । हृतदोषप्रमाणेन सदाहारविधिः स्मृतः । त्रीणि चात्र प्रमाणानि प्रस्थोऽर्द्धाढकमाढकम् ॥ तत्रावरं प्रस्थमात्रं द्वे शेषे मध्यमोत्तमे ॥ प्रस्थे परिस्रुते देया यवागूः स्वल्पतण्डुला । द्वे चैवार्द्धाढके देया तिस्रश्चाप्याढके गते ॥ विलेपीमुचिताङ्कृत्वाच्चतुर्थांशकृतां ततः । दद्याद्युक्तेन विधिना क्लिन्नसिक्थामपिच्छिलाम् ॥ अस्निग्धलवणां स्वच्छमुद्गयूषयुतान्ततः । अंशद्वयप्रमाणेन दद्यात्तु स्निग्धमोदनम् ॥ ततः सप्तममन्नेन हृद्येनेन्द्रियबाधिना । त्रीनंशान् वितरेद्भोक्तुमातुरायौदनं मृदुम् । ततो यथोचितं भक्तम्भोक्तुमस्मै विचक्षणः ॥ लावणैर्हरिणादीनां रसैर्द्द्यात्तु संस्कृतैः । हीनमध्योत्तमेष्वेव विरेकेषु विधिः स्मृतः ॥ एकद्वित्रिगुणः सम्यगाहारस्य क्रमो हि सः । कफपित्ताधिकान्मद्यनित्यान्हीनविशोधितान् ॥ पेयाभिष्यन्दयेत्तेषां तर्पणादिक्रमो हितः । वेदनालाभनियमशोकवैचित्त्यहेतुभिः ॥ नरानुपोषितांश्चापि विरक्तवदुपाचरेत् । आढकार्द्धाढकप्रस्थसङ्ख्या ह्येषा विरेचने ॥ एको विरेकः श्लेष्मान्तो न द्वितीयोऽस्ति कश्चन । बलं यत्त्रिविधं प्रोक्तमतस्तत्र क्रमास्त्रिधा ॥ तत्रानुक्रममेकन्तु बलस्थः सकृदाचरेत् । द्विराचरेन्मध्यबलस्त्रीन्वारान्दुर्ब्बलस्तथा ॥ केचिदेवं क्रमं प्राहुर्मन्दमध्योत्तमाग्निषु । संसर्गेण विवृद्धेऽग्नौ दोषकोपभयाद्व्रजेत् ॥ प्राक्स्वादुतिक्तौ स्निग्धाम्ललवणान्कटुकं ततः । स्वाद्वम्ललवणान्भूयः स्वादुतिक्तावतः परम् ॥ स्निग्धरूक्षान्रसांश्चैव व्यत्यासात्स्वस्थवत्ततः । केवलं स्नेहपीतो वा वान्तो यश्चापि केवलम् ॥ स सप्तरात्रं मनुजो भुञ्जीत लघु भोजनम् । क्षतः सिराव्यधो यस्य क्षतं यस्य च शोधनम् ॥ स ना परिहरेन्मासं यावद्वा बलवान्भवेत् । एकैकस्मिन्परिहरेद्बस्तौ वस्तौ त्र्यहं त्र्यहम् ॥ तृतीये तु परीहारे यथायोगं समाचरेत् । तैलपूर्णामृद्भाण्डसधर्माणो व्रणातुराः ॥ स्निग्धशुद्धास्त्रिरोगार्त्ता ज्वरातीसारिणश्च ये । क्रुध्यतः कुपितं पित्तं कुर्य्यात्तांस्तानुपद्रवान् ॥ आयास्यतः शोचतो वा चित्तं विभ्रममृच्छति । मैथुनोपगमाद्घोरान् व्याधीनाप्नोति दुर्मतिः ॥ आक्षेपकं पक्षघातमङ्गप्रग्रहमेव च । गुह्यप्रदेशे श्वयथुं कासश्वासौ च दारुणौ ॥ शुक्रवच्चापि रुधिरं सरजस्कं प्रवर्त्तते । लभते च दिवास्वप्नात्तांस्तान् व्याधीन् कफात्मकान् ॥ प्लीहोदरं प्रतिश्यायं पाण्डुतां श्वयथुं ज्वरम् । मोहं सदनमङ्गानामविपाकं तथाऽरुचिम् ॥ तमसा चाभिभूतस्तु स्वप्नमेवाभिनन्दति । उच्चैः सम्भाषणाद्वायुः शिरस्यापादयेद्रुजम् ॥ आन्ध्यं जाड्यमजिघ्रत्वं बाधिर्य्यं मूकतां तथा ॥ हनुमोक्षमथीमन्यं मर्द्दितञ्च सुदारुणम् । नेत्रस्तम्भं निमेषं वा तृष्णां कासं प्रजागरम् ॥ लभते दन्तचालं च तांस्तांश्चान्यानुपद्रवान् । यानयानात्तु लभते छर्द्दिमूर्च्छाभ्रमक्लमान् ॥ तथैवाङ्गग्रहं घोरमिन्द्रियाणाञ्च विभ्रमम् । चिरासनात्तथा स्थानाच्छ्रोण्यां भवति वेदना ॥ अतिचङ्क्रमणाद्वायुर्जङ्घयोः कुरुते रुजः । सक्थिप्रशोषं शोफं वा पादहर्षमथापि वा ॥ शीतसम्भोगतोयानां सेवा मारुतहृद्धये । ततोऽङ्गमर्द्दविष्टम्भशूलाध्मानप्रवेपकाः ॥ वातातपाभ्यां वैवर्ण्यं ज्वरं चापि समाप्नुयात् । विरुद्धाध्यशनान्मृत्युं व्याधिं वा घोरमृच्छति ॥ असात्म्यभोजनं हन्याद्बलवर्णमसंशयम् । अनात्मवन्तः पशुवद्भुञ्जते येऽप्रमाणतः ॥ रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि । व्यापदां कारणं वीक्ष्य व्यापत्स्वेतासु बुद्धिमान् ॥ प्रयतेतातुरारोग्ये प्रत्यनीकेन हेतुना ॥ विरिक्तवान्तैर्हरिणैणलावकाः शशाश्च सेव्यः समयूरतित्तिरिः । सषष्टिकाश्चैव पुराणशालयस्तथैव मुद्गा लघु यच्च कीर्त्तितम्" ॥ एवमन्येऽपि तत एवावगम्याः ।

**आतुर्य्य** न० आतुरस्य भावः ष्यञ् । १ आतुरत्वे २ फलनाशके ज्वरांशभेदे च "ज्वरांशाश्च वस्तुभेदेन नानाविधाः" हरि० १८३ अध्या० दर्शिताः। "कृष्ण उवाच । शृणुष्व ज्वर । सन्देशं यथा लोके चरिष्यसि । सर्व्वजातिषु विन्यस्तस्तथा स्थावर जङ्गमे । त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसे । चतुष्पदान् भजैकेन द्वितीयेन च स्थावरान् । तृतीयो यश्चतुर्भागो मानुषेषु प्रपत्स्यसे । त्रिधा भूतं वपुः कृत्वा पक्षिषु त्वं भव ज्वर ! । चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् । एकान्ततश्चतुर्भागः खोरकस्य चतुर्थकः । मानुषेष्वेकपादेन वस त्वं प्रविभज्य वै । जातिष्वथ विशेषास्तु शिवसत्त्वं शृणुष्व मे । वृक्षेषु कीटरूपेण तथा सङ्कोचपत्रकः । पाण्डुपत्रश्च विख्यातः फलेष्वातुर्य्यमेव च पद्मिनीषु हिमोभूत्वा पृथिव्यामपि चोषरः । अपान्तु पौलिका विद्याः शिखोद्भेदश्च वर्हिणाम् । गैरिकः पर्व्वतेष्वेव मत्प्रसादाद्भविष्यसि । गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि । एवं विविधरूपेण भविष्यसि महीतले । दर्शनात्